**United International Journal of Multidisciplinary Research**
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

# कृष्णयजुर्वेदीयधर्मसूत्रेषूपवर्णिताः शिक्षाव्यवस्था

**(Puneshment System in Krishnayajurvedeeya Dharmasutras)**

**Dr. Asavadi Sudhama Vamsi**
**M.A., M.Phil., PhD., NET in Sanskrit**
**M.A., (TEL)., M.A (Darmashstram)**
**Lecturer in Sanskrit,**
**Government College (A),**
**Ananthapuramu,**
**515001, Andra Pradesh.**

***"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृति स्तथा"*** इत्यभियुक्तोक्तिमाधारीकृत्य संस्कृतभाषा, भारतीयसंस्कृतिः च अत्यन्त प्राचीनेति निश्चप्रचं वचः। देवता व्यवहारयोग्यत्वात् संस्कृतभाषा देवभाषा इत्यभिप्रधिता। दिव् धातोः द्योतनमित्यर्थः कस्य द्योतनं इत्याकांक्षायाम् आत्मसंस्कारद्योतनमिति समाधेयम्। यतोहि_***"वाण्येका समलंङ्करोति पुरुषं या संस्कृता धार्यते", वाक् वैदोग्ध्री------ धेनुर्वागिस्मान् उपसुष्टुतैतु*** इत्यादि प्रामाण्यवचनानि संस्कृतभाषायाः, संस्कृतेश्च अविनाभावसम्बन्धं ख्यापयन्ति।

वैदिककालादारभ्य आधुनिककालपर्यन्तं संस्कृतभाषा गंङ्गादिपुण्यजीवनदीव आसंसारमस्मान् पुणति। एतादृश महत्वपूर्णायाः संस्कृतेः उज्जीवनाय, परिरक्षणाय बद्धपरिकरास्ताः महाभागाः नित्यस्मरणीयाः भवन्ति वल्मीकिव्यासादयाः।

इह खलु मनुजः सर्वश्रेष्ठो प्राणिविशेषः। चराचरजगति मानवजन्म एवोत्तमजन्मेति जिगीयते। भगवता पुरुषार्थचतुष्टयस्य साधनाय दत्तः अपूर्वः अवसरविशेषो मानवजन्मैव। पुनश्च नरजन्मदुर्लभमिति जेगीयते प्राच्यैः विपश्चितैः-

***नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।***
***कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा।।***

तादृशः मनुजः सामाजिकप्राणी वर्तते। सः समाजस्य परिस्थितीनाम् अनुसारं जीवेत। मनुजानां परस्परम् अनुपहतजीवनाय केचन नियमाः कालानुसारं प्रकल्पिताः। ते एव नियमाः वेदेषु, ब्राह्मणेषु, आरण्यकेषु, उपनिषत्सु, काव्येषु, नाटकेषु किमुताधिकेन कथनेन सर्वत्र विलसिताः उपलभ्यमानाः विराजन्ते।

सामाजिकनियमानाम् उल्लेखनं यद्यपि बहुत्र लभ्यते तथापि धर्मसूत्रेषु तेषामुल्लेखनं धर्मानुबन्धि दृश्यते। वेदोपबृंहितसामाजिकनियमान् धर्मांश्च धर्मसूत्रग्रन्थाः उररीचक्रुः। एते ग्रन्थाः प्राक्तनकाले सामाजिकस्थितिः, सामाजिकव्यवस्था, सामाजिकानां सर्वेषाम् आचारव्यवहाराः कथमासन् इति स्पष्टीकरोति।

धर्मसूत्रग्रन्थास्तावत् वेदाङ्गस्य कल्पेत्याख्यस्य तृतीयाङ्गत्वेन प्रथिताः वर्तन्ते। एते एव तत्कालीनस्य समाजस्योन्नत्यै योगदानं दत्तवन्तः। धर्मसूत्रग्रन्थाः वेदाङ्गस्य कल्पस्याङ्गाः इति कृत्वा अग्रे वेदस्य, वेदाङ्गानाञ्च परिचयः क्रमशः दीयते।

**राज्यपालनम्**

कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु राज्यपालनविधिः सम्यक् निरूपिता। राज्यपालनमिदम् अभिषिक्तस्य क्षत्रियस्य धर्मसम्मतकर्मसु प्राधानतमकर्म भवति।

क्षत्रियस्य धर्मसूत्रसम्मतानि कर्माणि तावत् त्रिष्वपि धर्मसूत्रेषु एकरीत्यैव प्रोक्तानि। त्रिष्वपि धर्मसूत्रेषु क्षत्रियस्य धर्मसूत्रसम्मतानि कर्माणि पञ्च संख्याकान्येव उपदिष्टानि। तत्र बोधायनधर्मसूत्रे अध्ययनं, यजनं, दानं, युद्धं (शत्रुभिस्सह), कोश (धनागार) भूत (प्रजानांप्राणिनां च सर्वेषां) रक्षणम् अर्थात् राज्यरक्षणम् इति पञ्च कर्माणि क्षत्रियधर्मत्वेनोक्तानि–

***क्षत्रे बलमध्ययनयजनदानशास्त्रकोशभूतरक्षणसंयुक्तं क्षत्रस्य वृद्ध्यै*** [1a] इति।

आपस्तम्बहिरण्यकेशिधर्मसूत्रयोस्तु अध्ययनयजनदानयुद्धदण्डानि पञ्च संख्याकानि क्षत्रियानां धर्मसम्मतकर्मत्वेनोक्तानि

***एतान्येव क्षत्रियस्याऽध्यापनयाजनप्रतिग्रहणानीति परिहाप्य दण्डयुद्धाधिकानि*** [1b] इति। अत्र दण्डः तावत् राज्यपालनान्तर्गतत्वात् तच्छब्देन राज्यपालनं सूच्यते। एवं त्रिष्वपि धर्मसूत्रेषु क्षत्रियस्य कर्मत्वेन अध्ययनं, यजनं, दानं, युद्धं, राज्यपालनञ्च पञ्च संख्याकानि प्रोक्तानि।

पञ्चस्वपि कर्मस्वेतेषु राज्यपालनं प्राधानं भवति। राज्यपालनाङ्गत्वेन **नगरप्रासादनिर्माणक्रमः, सामान्यराजधर्माः, करव्यवस्था, दण्डव्यवस्था च** धर्मसूत्रेष्वेषु विशेषरूपेण चर्चितास्सन्ति। नगरप्रासादयोर्निर्माणं शत्रुदुर्भेद्यत्वेन कर्तव्यमिति, राजा क्षेमङ्करो भूयादिति, राजानः सकालं भृत्येभ्यो वेतनं दद्युरिति, चौर्यस्य निवारणाय ग्रामरक्षापुरुषनगररक्षापुरुषयोः नियुक्तिः कार्येति, धार्म्यः शुल्कः एव स्वीकार्येति, अपराधनिर्णयविधिः समीचीनतया स्यादिति, साक्षिणा सत्यमेवोक्तव्यमिति, अपराधनिर्णायकानां (JUDGES) नियुक्तिः कार्येति च अत्र धर्मसूत्रेष्वेषु निरूपितम्। साम्प्रतमेतेंऽशाः यथाक्रमं निरूप्यन्ते।

**दण्डव्यवस्था**

कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु बोधायनापस्तम्बहिरण्यकेशिधर्मसूत्रेषु बोधायनधर्मसूत्रं विहाय अन्ययोः धर्मसूत्रयोः द्वयोः दण्डव्यवस्था विशेषरूपेण उपवर्णिता। प्रकृतविषयोऽयं बोधायनधर्मसूत्रे सामान्यरूपेण परामृष्टः। परन्तु आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः सुविस्तृतं चर्चितः।

राज्यपालने दण्डनविधिः अत्यन्तं प्रमुखोंऽशः भवति। दण्डनेनैव अपराधिनः ऋजुमार्गे कर्तुं शक्यत इति कृत्वा अपराधिने दण्डनमवश्यं कर्तव्यं भवति। बोधानापस्तम्बहिरण्यकेशिधर्मसूत्राणां सूत्राणामनुशीलनेन तत्काले पुरुषवधः, स्तेयं (चौर्यं), परक्षेत्रस्य बलात्स्वीकारः, सन्निपातमैथुनं (बलान्मैथुनं, अद्यत्वे RAPE इत्युच्यते), परभार्यागमनं, नियमोल्लङ्घनं, धर्मच्युतिरित्यादयः प्रधानाः अपराधाः आसन्। अपराधिनं दण्डयितुं सत्यासत्यत्वनिश्चयश्च कर्तुं निर्णायकः (JUDGE) आसीदिति, स च साक्षिणां वचनाधारेणैव अपराधनिश्चयं करोति स्मेति ज्ञायते। किञ्च निर्णायकेन अपराधिने विहितस्य दण्डनस्य न्यूनीकरणमपि राजा कर्तुं प्रभवतीति (अयमंशः अद्यत्वेऽपि भारते वर्तते यत् उच्चन्यायालयेन घोषितस्य दण्डनस्य न्यूनीकरणं राष्ट्रपतिः कर्तुं प्रभवत्येव) ज्ञायते।

सम्प्रति तां दण्डव्यवस्थाम् अधिकृत्य बोधायनापस्तम्बहिरण्यकेशि- धर्मसूत्रकाराणां विचाराः प्रदर्श्यन्ते।

United International Journal of Multidisciplinary Research
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

**अपराधस्य निर्णायकः (JUDGE)**

आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः निर्णायकस्य नियुक्तिविषयेऽपि चर्चितः वर्तते। सः अपराधनिर्णायकः विद्यासम्पन्नः, कुलीनः, वृद्धः, बुद्धिमान्, धर्मपालकश्च भवेदिति, एतादृग्गुणपेतमेव निर्णायकत्वेन नियुञ्जीतेति तत्रोच्यते– ***विवादे विद्याभिजनसम्पन्ना वृद्धा मेधाविनो धर्मेष्वविनिपातिनः***[3] इति। परं बोधायनधर्मसूत्रे निर्णायकलक्षणनियुक्तिविषये न किमपि चर्चितः।

**अपराधनिर्णयविधिः**

अपराधनिर्णये अपराधिनः अपराधस्य सम्यक् परीक्षा कर्तव्या। इतरथा कृतस्य अधर्मस्य पादः एव अपराधिनं गच्छेत्। इतरे त्रयः पादाः साक्षि-सभासत्-राजगाः इत्युक्तम्। अतः सुविचिन्त्य एव दण्डः देयः इति बोधायनधर्मसूत्रे उच्यते-

***पादोऽधर्मस्य कर्तारं पादो गच्छति साक्षिणम् ।***
***पादस्सभासदस्सर्वान् पादो राजानमृच्छति ।।***
***राजा भवत्यनेनाश्च मुच्यन्ते च सभासदः।***
***एनो गच्छति कर्तारं यत्र निन्द्यो ह निन्द्यते***[32] ***।।***

अपस्तम्बहिरण्यकेशिधर्मसूत्रयोरपि आदैवप्रश्नेभ्यः साक्षिप्रश्नादिभिः शपथान्तैः सुविचिन्त्यैव निरूप्यैव राजा दण्डाय उपक्रमेतेति, सति सन्देहे राजा दण्डं न कुर्यात् इति च प्रस्तूयते– ***सुविचितं विचित्यादैवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्येत, न च सन्देहे दण्डं कुर्यात्***[33] इति।

यदि दयया अर्थलोभेन वा अपराधिने दण्डनं न विहितं तर्हि तद् अपराधः राजानमेव स्पृशतीति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः उक्तम्– ***प्राप्तनिमित्ते दण्डाकर्मणि राजानमेनंस्पृशति***[4] इति।

अपराधनिर्णये साक्ष्यस्य प्रामुख्यता वरीवर्ति। साक्षिसाक्ष्यविषयेऽपि बोधायनापस्तम्बहिरण्यकेशिधर्मसूत्रषु चर्चितं वर्तते। श्रोत्रियः, राजन्यः, सन्यासी, बान्धवाश्च साक्षिरूपेण नानुमन्यन्ते इति, एषामतिरिच्य यः कोऽपि सन्तानवान् साक्षी भवतीति बोधायनधर्मसूत्रे निर्दिष्टम्- ***चत्वारो वर्णाः पुत्रिणः साक्षिणस्स्युरन्यत्र श्रोत्रियराजन्यप्रव्रजित- मानुष्यहीनेभ्यः***[5] इति। आपस्म्बहिरण्यकेशिधर्मसूत्रयोस्तु एतादृशः विचारः न दृष्टः।

साक्षिणादौ सत्यभाषणप्रतिज्ञा कार्या भवतीति आपस्तम्ब- हिरण्यकेशिधर्मसूत्रयोः उक्तम्– ***पुण्याहे प्रातरग्नाविद्धेऽपामन्ते राजवत्युभयतस्समाख्याप्य सर्वानुमते मुख्यस्सत्यं प्रश्नं ब्रूयात्***[6] इति।

अर्थात् साक्षिणा सत्यमेव ब्रूयादिति सिध्यति। बोधायनेऽपि यथाश्रुतं यथादृष्टं चैव सत्यं साक्षिणा वक्तव्यमिति उच्यते– ***लोकसङ्ग्रहणार्थं यथादृष्टं यथाश्रुतं साक्षी ब्रूयात्***[7] इति। साक्षिणा अनृतमुक्तमिति प्रतिपन्ने राजा तं साक्षिणं दण्डयेदिति, सः अनृतसाक्षी नरकं गच्छतीति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः उच्यते– ***अनृते राजा दण्डं प्रणयेत, नरकश्चाऽत्राधिकः साम्पराये***[8] इति।

बोधायनस्तु अनृतसाक्षिणे पितृघातकपापं सम्पद्यते इति सूचयति– ***त्रीनेव च पितॄन् हन्ति त्रीनेव च पितामहान्, सप्त जातानजातांश्च साक्षी साक्ष्यं मृषा वदन्***[9] इति।

एवं साक्षिणः सत्यमेव ब्रूयुरित्याशंसा त्रयाणामेतेषां धर्मसूत्राणामिति ज्ञायते। साक्षिणा सत्ये उक्ते सति स्वर्गप्राप्तिरिति आपस्तम्बहिरण्यकेशि- धर्मसूत्रयोः उच्यते– ***सत्ये स्वर्गस्सर्वभूतप्रशंसा च***[10] इति।

एवम् अपराधनिर्णायकविषये, अपराधनिर्णयविधिविषये त्रिषु धर्मसूत्रेषु चर्चितम्। साम्प्रतं तत्तदपराधानां दण्डनविधानं प्रस्तूयते।

**3.पुरुषवधादौ दण्डनविधिः**

शूद्रेण पुरुषवधे, चौर्ये, परक्षेत्रस्य बलात्स्वीकारे च कृते सति राजा तच्छूद्रस्य सर्वस्वं हृत्वा तं वध्यादिति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तूयते– ***पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः***[11] इति।

यदि उक्तापराधः ब्राह्मणेन क्रियते तर्हि यावज्जीवं पट्टबन्धादिना चक्षुनिरोधदण्डः आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः उक्तः– ***चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य***[12] इति। परन्तु ब्राह्मणेन ब्रह्महत्या (ब्राह्मणहत्या)– गुरुतल्पगमन-चौर्याद्यपराधे कृते सति तस्य देशबहिष्कारः दण्डत्वेनोपदिष्टः, तथापि तद् ब्राह्मणस्य सर्वस्वं राजा नादधीतेति, सर्वापराधेष्वपि ब्राह्मणः अवध्य इति बोधायनधर्मसूत्रे निर्दिष्टम्– ***ब्राह्मणस्य ब्रह्महत्यागुरुतल्पगमनस्वर्णस्तेयसुरापानेषु कुसिन्धभगसृगाल सुराध्वजांस्ततेनाऽयसा ललाटेऽङ्कयित्वा विषयान्निर्धमनम्***[13], ***न त्वेव कदाचित्स्वयं राजा ब्राह्मणस्वमाददीत***[14], ***अवध्यो व ब्राह्मणस्सर्वापराधेषु***[15] इति। किन्तु, क्षत्रियादीनां ब्राह्मणवधे अर्थात् निकृष्टजातियेनोत्कृष्टजातीयवधे वधस्सर्वस्वहरणं च दण्डत्वेनोक्तः– ***क्षत्रियादीनां ब्राह्मणवधे वधस्सर्वस्वहरणं च***[16] इति। एवं पुरुषवधे, परक्षेत्रस्य बलात्स्वीकारे, चौर्ये च दण्डनविधिः प्रदर्शिता।

**बलान्मैथुने दण्डनविधिः**

बलान्मैथुनस्य दण्डनविषये बोधायनधर्मसूत्रे यद्यपि न किमपि चर्चितं, तथापि आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः अस्य बलान्मैथुनस्य दण्डनविधिः सूचिता। कयाचित् स्त्रिया सह केनापि पुरुषेण बलान्मैथुने कृते सति, तस्य शिश्नस्य छेदनं सवृषणं करणीयमिति, यदि सा स्त्री कन्या भवति चेत् तस्य सर्वस्वहरणं कृत्वा, देशबहिष्कारः कर्तव्यः इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तूयते– ***सन्निपाते वृत्ते शिश्नच्छेदनं सवृषणस्य, कुमार्यां तु स्वान्यादाय नाश्यः***[17] इति।

**परभार्यागमने दण्डनविधिः**

परभार्यागमनविषये बोधायनधर्मसूत्रे न कोऽपि दण्डनविधिः उपलभ्यते। परन्तु आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः अस्य परभार्यागमनस्य दण्डनविधिः उपलभ्यते। आर्याः त्रैवर्णिकाः ब्राह्मणक्षत्रियवैश्याः परभार्यायां शूद्रायां प्रसक्ताश्चेत् तेभ्यः देशबहिष्कारः दण्डत्वेन उक्तः– ***नाश्य आर्यश्शूद्रायाम्***[18] इति। तथैव यदि कोऽपि शूद्रः त्रैवर्णिकस्त्रियां प्रसक्तश्चेत्सः शूद्रः वध्यः इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तूयते– ***वध्यः शूद्र आर्यायाम्***[19] इति। एवं परभार्यागमनापराधस्यापि दण्डनविधिस्तदानीमासीत्।

**नियमोल्लङ्घने दण्डनविधिः**

आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः नियमातिक्रमणस्यापि दण्डनविधिः उक्ता। यो वर्णाश्रमप्रयुक्तान् नियमान् अतिक्रामति तं नियमातिक्रमिणं, यावत्पर्यन्तं *नियमान् पालयिष्ये, प्रतिषिध्देभ्यः कर्मभ्यः निवर्तिष्ये* इति प्रतिज्ञां धारयति तावत्पर्यन्तं रहसि बन्धयेदिति, यदि दीर्घकालादनन्तरमपि स नियमातिक्रमी न प्रतिज्ञां धारयति तदा तं नियमातिक्रमिणं देशात् निर्वास्य इति च उच्यते– ***नियमातिक्रमिणमन्यं वा रहसि बन्धयेत्, आसमापत्तेः, असमापत्तौ नाश्यः***[20] इति। अयं नियमातिक्रमिणः दण्डनविधिः बोधायनधर्मसूत्रे न दृश्यते।

**धर्मच्युतौ दण्डनविधिः**

कर्मच्युतौ धर्मच्युतौ वा प्रायश्चित्तमेव दण्डनविधित्वेन आपस्तम्बहिरण्यकेशिसूत्रयोः उक्तः- ***शास्त्रैरधिगतानामिन्द्रियदौर्बल्याद्विप्रतिपन्नानां शास्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम्***[21] इति।

यदि कोऽपि धर्मच्युतः ब्राह्मणः प्रायश्चित्तं नाचरति, तस्मै वधं दास्यं च वर्जयित्वा बन्धनादिभिः उपवासादिभिश्च तच्छरीरम् उपशोषयेत्- ***बलविशेषेण वधदास्यवर्जं नियमैरूपशोषयेत्***[22] इति। ब्राह्मणेतराणान्तु कर्मच्युतिमनुसृत्य वधः अपि दण्डत्वेनोक्तः– ***इतरेषां वर्णानामा प्राणविप्रयोगात् समवेक्ष्य तेषां कर्माणि राजा दण्डं प्रणयेत्***[23] इति। अयमप्यंशः बोधायनधर्मसूत्रे न दृश्यते।

**दण्ड्यस्य त्राणम् (दण्डनस्य न्यूनीकरणम्)**

वधदण्डनं विहाय अपराधिने विहितान् अन्यान् दण्डान् राजा न्यूनीकर्तुं शक्नोतीति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः उक्तमस्ति–

***आचार्य ऋत्विक्स्नातको राजेति त्राणं स्युरन्यत्र वध्यात्, आचार्य ऋत्विक्स्नातकस्तु श्व (कः श्व) शुरो गजेति त्राणं स्युरन्यत्र वध्यात्***[24] इति।

एतत् दण्डनस्य न्यूनीकरणं यद्वर्तते तदद्यापि भारतदेशे दृश्यते यत् उच्चन्यायालयेन घोषितं वधदण्डनमपि राष्ट्रपतिः न्यूनीकर्तुं प्रभवत्येव। परन्त्विदं दण्डनस्य न्यूनीकरणं बोधायने न दृश्यते। इत्थं दण्डनविधिः धर्मसूत्रेषु त्रिषु उपवर्णितः।

इत्थं कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु राज्यपालने शिक्षाव्यवस्था सम्यक् निरूपिता वर्तते ।

<u>उपयुक्तग्रन्थसूची</u>

**1a. बो. 1.10.18.3,**
**1b. आप. 2.5.10.7, हि. 27.4.6**
**2. आप. 2.11.29.5, हि. 27.6.18 32. बो. 1.10.19.10**
**3. आप. 2.5.11.3,2, हि. 27.4.19,18,**
**4. आप. 2.11.28.14 हि. 27.6.13**
**5. बो. 1.11.20.16,**
**6. आप. 2.11.29.7 हि. 27.6.20**
**7. बो. 1.10.19.9**
**8. आप. 2.11.29.8,9, हि. 27.6.21,22**
**9. बो. 1.11.20.13,14**
**10. आप. 2.11.29.10 हि. 27.6.23**
**11. आप. 2.10.27.16, हि. 27.5.23512. आप. 2.10.27.17, हि. 27.5.236**
**13. बो. 1.10.18.18**
**14. बो. 1.5.11.13**
**15. बो. 1.10.18.17**
**16. बो. 1.10.18.19**
**17. आप. 2.10.26.20,21 हि. 27.5.215,216**
**18. आप. 2.10.27.8, हि. 27.5.227**
**19. आप. 2.10.27.9 हि. 27.5.228,**
**20. आप. 2.10.27.18,19,20, हि. 27.5.237.238**
**21. आप. 2.5.10.13 हि. 27.4.12**
**22. आप. 2.5.10.17 हि. 27.4.16**
**23. आप. 2.5.11.01 हि. 27.4.17**
**24. आप. 2.10.27.21 हि. 27.5.239**

**United International Journal of Multidisciplinary Research**
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

**उपयुक्त ग्रन्थाः**

**1.अपस्थम्ब धर्मसूत्रम, 2. बौधायन धर्मसूत्रम्, 3. हिरण्यकेशि धर्मसूत्रम्**